# ज्ञानकर्मसन्न्यासयोगः (jñānakarmasannyāsayogaḥ)

ॐ श्रीपरमात्मने नमः। अथ चतुर्थोऽध्यायः। ज्ञानकर्मसन्न्यासयोगः।
om śrīparamātmane namaḥ. atha caturtho'dhyāyaḥ. jñānakarmasannyāsayogaḥ

| | | |
|---|---|---|
| 1. | श्रीभगवानुवाच।<br>इमं विवस्वते योगम् प्रोक्तवानहमव्ययम्।<br>विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्॥ | śrībhagavānuvāca<br>imaṁ vivasvate yogam<br>proktavānahamavyayam<br>vivasvānmanave prāha<br>manurikṣvākave'bravīt |
| 2. | एवं परम्पराप्राप्तम् इमं राजर्षयो विदुः।<br>स कालेनेह महता योगो नष्टः परन्तप॥ | evaṁ paramparāprāptam<br>imaṁ rājarṣayo viduḥ<br>sa kāleneha mahatā<br>yogo naṣṭaḥ parantapa |
| 3. | स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः।<br>भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम्॥ | sa evāyaṁ mayā te'dya<br>yogaḥ proktaḥ purātanaḥ<br>bhakto'si me sakhā ceti<br>rahasyaṁ hyetaduttamam |
| 4. | अर्जुन उवाच।<br>अपरं भवतो जन्म परं जन्म विवस्वतः।<br>कथमेतद्विजानीयाम् त्वमादौ प्रोक्तवानिति॥ | arjuna uvāca<br>aparaṁ bhavato janma<br>paraṁ janma vivasvataḥ<br>kathametadvijānīyām<br>tvamādau proktavāniti |
| 5. | श्रीभगवानुवाच।<br>बहूनि मे व्यतीतानि जन्मानि तव चार्जुन।<br>तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप॥ | śrībhagavānuvāca<br>bahūni me vyatītāni<br>janmāni tava cārjuna<br>tānyahaṁ veda sarvāṇi<br>na tvaṁ vettha parantapa |
| 6. | अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्।<br>प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया॥ | ajo'pi sannavyayātmā<br>bhūtānāmīśvaro'pi san<br>prakṛtiṁ svāmadhiṣṭhāya<br>sambhavāmyātmamāyayā |
| 7. | यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।<br>अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥ | yadā yadā hi dharmasya<br>glānirbhavati bhārata<br>abhyutthānamadharmasya<br>tadātmānaṁ sṛjāmyaham |

| | | |
|---|---|---|
| 8. | परित्राणाय साधूनाम् विनाशाय च दुष्कृताम्।<br>धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥ | paritrāṇāya sādhūnām<br>vināśāya ca duṣkṛtām<br>dharmasaṁsthāpanārthāya<br>sambhavāmi yuge yuge |
| 9. | जन्म कर्म च मे दिव्यम् एवं यो वेत्ति तत्त्वतः।<br>त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन॥ | janma karma ca me divyam<br>evaṁ yo vetti tattvataḥ<br>tyaktvā dehaṁ punarjanma<br>naiti māmeti so'rjuna |
| 10. | वीतरागभयक्रोधाः मन्मया मामुपाश्रिताः।<br>बहवो ज्ञानतपसा पूता मद्भावमागताः॥ | vītarāgabhayakrodhāḥ<br>manmayā māmupāśritāḥ<br>bahavo jñānatapasā<br>pūtā madbhāvamāgatāḥ |
| 11. | ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।<br>मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥ | ye yathā māṁ prapadyante<br>tāṁstathaiva bhajāmyaham<br>mama vartmānuvartante<br>manuṣyāḥ pārtha sarvaśaḥ |
| 12. | काङ्क्षन्तः कर्मणां सिद्धिम् यजन्त इह देवताः।<br>क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा॥ | kāṅkṣantaḥ karmaṇāṁ siddhim<br>yajanta iha devatāḥ<br>kṣipraṁ hi mānuṣe loke<br>siddhirbhavati karmajā |
| 13. | चातुर्वर्ण्यं मया सृष्टम् गुणकर्मविभागशः।<br>तस्य कर्तारमपि माम् विद्ध्यकर्तारमव्ययम्॥ | cāturvarṇyaṁ mayā sṛṣṭam<br>guṇakarmavibhāgaśaḥ<br>tasya kartāramapi mām<br>viddhyakartāramavyayam |
| 14. | न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा।<br>इति मां योऽभिजानाति कर्मभिर्न स बध्यते॥ | na māṁ karmāṇi limpanti<br>na me karmaphale spṛhā<br>iti māṁ yo'bhijānāti<br>karmabhirna sa badhyate |
| 15. | एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः।<br>कुरु कर्मैव तस्मात्त्वम् पूर्वैः पूर्वतरं कृतम्॥ | evaṁ jñātvā kṛtaṁ karma<br>pūrvairapi mumukṣubhiḥ<br>kuru karmaiva tasmāttvam<br>pūrvaiḥ pūrvataraṁ kṛtam |

| | | |
|---|---|---|
| 16. | किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः।<br>तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥ | kiṁ karma kimakarmeti<br>kavayo'pyatra mohitāḥ<br>tatte karma pravakṣyāmi<br>yajjñātvā mokṣyase'śubhāt |
| 17. | कर्मणो ह्यपि बोद्धव्यम् बोद्धव्यं च विकर्मणः।<br>अकर्मणश्च बोद्धव्यम् गहना कर्मणो गतिः॥ | karmaṇo hyapi boddhavyam<br>boddhavyaṁ ca vikarmaṇaḥ<br>akarmaṇaśca boddhavyam<br>gahanā karmaṇo gatiḥ |
| 18. | कर्मण्यकर्म यः पश्येत् अकर्मणि च कर्म यः।<br>स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत्॥ | karmaṇyakarma yaḥ paśyet<br>akarmaṇi ca karma yaḥ<br>sa buddhimānmanuṣyeṣu<br>sa yuktaḥ kṛtsnakarmakṛt |
| 19. | यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः।<br>ज्ञानाग्निदग्धकर्माणम् तमाहुः पण्डितं बुधाः॥ | yasya sarve samārambhāḥ<br>kāmasaṅkalpavarjitāḥ<br>jñānāgnidagdhakarmāṇam<br>tamāhuḥ paṇḍitaṁ budhāḥ |
| 20. | त्यक्त्वा कर्मफलासङ्गम् नित्यतृप्तो निराश्रयः।<br>कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः॥ | tyaktvā karmaphalāsaṅgam<br>nityatṛpto nirāśrayaḥ<br>karmaṇyabhipravṛtto'pi<br>naiva kiñcitkaroti saḥ |
| 21. | निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः।<br>शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम्॥ | nirāśīryatacittātmā<br>tyaktasarvaparigrahaḥ<br>śārīraṁ kevalaṁ karma<br>kurvannāpnoti kilbiṣam |
| 22. | यदृच्छालाभसन्तुष्टः द्वन्द्वातीतो विमत्सरः।<br>समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते॥ | yadṛcchālābhasantuṣṭaḥ<br>dvandvātīto vimatsaraḥ<br>samaḥ siddhāvasiddhau ca<br>kṛtvāpi na nibadhyate |
| 23. | गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः।<br>यज्ञायाचरतः कर्म समग्रं प्रविलीयते॥ | gatasaṅgasya muktasya<br>jñānāvasthitacetasaḥ<br>yajñāyācarataḥ karma<br>samagraṁ pravilīyate |

| | | |
|---|---|---|
| 24. | ब्रह्मार्पणं ब्रह्म हविः ब्रह्माग्नौ ब्रह्मणा हुतम्।<br>ब्रह्मैव तेन गन्तव्यम् ब्रह्मकर्मसमाधिना॥ | brahmārpaṇaṁ brahma haviḥ<br>brahmāgnau brahmaṇā hutam<br>brahmaiva tena gantavyam<br>brahmakarmasamādhinā |
| 25. | दैवमेवापरे यज्ञम् योगिनः पर्युपासते।<br>ब्रह्माग्नावपरे यज्ञम् यज्ञेनैवोपजुह्वति॥ | daivamevāpare yajñam<br>yoginaḥ paryupāsate<br>brahmāgnāvapare yajñam<br>yajñenaivopajuhvati |
| 26. | श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति।<br>शब्दादीन्विषयानन्ये इन्द्रियाग्निषु जुह्वति॥ | śrotrādīnīndriyāṇyanye<br>saṁyamāgniṣu juhvati<br>śabdādīnviṣayānanye<br>indriyāgniṣu juhvati |
| 27. | सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे।<br>आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते॥ | sarvāṇīndriyakarmāṇi<br>prāṇakarmāṇi cāpare<br>ātmasaṁyamayogāgnau<br>juhvati jñānadīpite |
| 28. | द्रव्ययज्ञास्तपोयज्ञाः योगयज्ञास्तथापरे।<br>स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः॥ | dravyayajñāstapoyajñāḥ<br>yogayajñāstathāpare<br>svādhyāyajñānayajñāśca<br>yatayaḥ saṁśitavratāḥ |
| 29. | अपाने जुह्वति प्राणम् प्राणेऽपानं तथापरे।<br>प्राणापानगती रुद्ध्वा प्राणायामपरायणाः॥ | apāne juhvati prāṇam<br>prāṇe'pānaṁ tathāpare<br>prāṇāpānagatī ruddhvā<br>prāṇāyāmaparāyaṇāḥ |
| 30. | अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति।<br>सर्वेऽप्येते यज्ञविदः यज्ञक्षपितकल्मषाः॥ | apare niyatāhārāḥ<br>prāṇānprāṇeṣu juhvati<br>sarve'pyete yajñavidaḥ<br>yajñakṣapitakalmaṣāḥ |
| 31. | यज्ञशिष्टामृतभुजः यान्ति ब्रह्म सनातनम्।<br>नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम॥ | yajñaśiṣṭāmṛtabhujaḥ<br>yānti brahma sanātanam<br>nāyaṁ loko'styayajñasya<br>kuto'nyaḥ kurusattama |

| | | |
|---|---|---|
| 32. | एवं बहुविधा यज्ञाः वितता ब्रह्मणो मुखे।<br>कर्मजान्विद्धि तान्सर्वान् एवं ज्ञात्वा विमोक्ष्यसे॥ | evaṁ bahuvidhā yajñāḥ<br>vitatā brahmaṇo mukhe<br>karmajānviddhi tānsarvān<br>evaṁ jñātvā vimokṣyase |
| 33. | श्रेयान्द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परन्तप।<br>सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते॥ | śreyāndravyamayādyajñāt<br>jñānayajñaḥ parantapa<br>sarvaṁ karmākhilaṁ pārtha<br>jñāne parisamāpyate |
| 34. | तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।<br>उपदेक्ष्यन्ति ते ज्ञानम् ज्ञानिनस्तत्त्वदर्शिनः॥ | tadviddhi praṇipātena<br>paripraśnena sevayā<br>upadekṣyanti te jñānam<br>jñāninastattvadarśinaḥ |
| 35. | यज्ज्ञात्वा न पुनर्मोहम् एवं यास्यसि पाण्डव।<br>येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि॥ | yajjñātvā na punarmoham<br>evaṁ yāsyasi pāṇḍava<br>yena bhūtānyaśeṣeṇa<br>drakṣyasyātmanyatho mayi |
| 36. | अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः।<br>सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि॥ | api cedasi pāpebhyaḥ<br>sarvebhyaḥ pāpakṛttamaḥ<br>sarvaṁ jñānaplavenaiva<br>vṛjinaṁ santariṣyasi |
| 37. | यथैधांसि समिद्धोऽग्निः भस्मसात्कुरुतेऽर्जुन।<br>ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा॥ | yathaidhāṁsi samiddho'gniḥ<br>bhasmasātkurute'rjuna<br>jñānāgniḥ sarvakarmāṇi<br>bhasmasātkurute tathā |
| 38. | न हि ज्ञानेन सदृशम् पवित्रमिह विद्यते।<br>तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति॥ | na hi jñānena sadṛśam<br>pavitramiha vidyate<br>tatsvayaṁ yogasaṁsiddhaḥ<br>kālenātmani vindati |
| 39. | श्रद्धावाँल्लभते ज्ञानम् तत्परः संयतेन्द्रियः।<br>ज्ञानं लब्ध्वा परां शान्तिम् अचिरेणाधिगच्छति॥ | śraddhāvām̐llabhate» jñānam<br>tatparaḥ saṁyatendriyaḥ<br>jñānaṁ labdhvā parāṁ śāntim<br>acireṇādhigacchati<br>» śraddhāvān-labhate |

| | | |
|---|---|---|
| 40. | अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति।<br>नायं लोकोऽस्ति न परः न सुखं संशयात्मनः॥ | ajñaścāśraddadhānaśca<br>saṁśayātmā vinaśyati<br>nāyaṁ loko'sti na paraḥ<br>na sukhaṁ saṁśayātmanaḥ |
| 41. | योगसन्न्यस्तकर्माणम् ज्ञानसञ्छिन्नसंशयम्।<br>आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय॥ | yogasannyastakarmāṇam<br>jñānasañchinnasaṁśayam<br>ātmavantaṁ na karmāṇi<br>nibadhnanti dhanañjaya |
| 42. | तस्मादज्ञानसम्भूतम् हृत्स्थं ज्ञानासिनात्मनः।<br>छित्त्वैनं संशयं योगम् आतिष्ठोत्तिष्ठ भारत॥ | tasmādajñānasambhūtam<br>hṛtsthaṁ jñānāsinātmanaḥ<br>chittvainaṁ saṁśayaṁ yogam<br>ātiṣṭhottiṣṭha bhārata |

ॐ तत् सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
ज्ञानकर्मसन्न्यासयोगो नाम चतुर्थोऽध्यायः॥

श्रीकृष्णार्पणमस्तु॥

om tat sat - iti śrīmadbhagavadgītāsu upaniṣatsu brahmavidyāyāṁ yogaśāstre śrīkṛṣṇārjunasaṁvāde jñānakarmasannyāsayogo nāma caturtho'dhyāyaḥ

śrīkṛṣṇārpaṇamastu